श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा


प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका

**डॉ. बी. उमामहेश्वरी**

सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,



**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका

**डॉ. बी. उमामहेश्वरी**

सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

**प्रकाशकः -**

**डॉ. दशरथजादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, 2020***

**संस्करणम्** - प्रथमम्

**वर्षम्** - मार्च -२०२०

**प्रतिकृतयः** - ३५०

**ISBN** - 978-93-83097-35-7

**मूल्यम्** - ₹५१०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ऑफसेट
परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,
एस. टी. रोड, वेरावल-३६२ २६६,
जि. गीर-सोमनाथ, गुजरात (भारत)
दूरभाष - ०२८७६-२२१८६१

Shree Somnath Sanskrit University Grantha Series - 16

# BHĀRATĪYADARŚANASIDDHĀNTAPRABHĀ

*Chief Editor*
**Prof. Gopabandhu Mishra**
Vice-Chancellor
Shree Somnath Sanskrit University
Veraval

*Editor*
**Dr. B. Uma Maheswari**
Assistant Professor
Shree Somnath Sanskrit University
Veraval

**Shree Somnath Sanskrit University - Veraval - Gujarat**

**Published by:**

**Dr. Dashrath Jadav**
Registrar
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.sssu.ac.in

**Assistant Editor & Co-ordinator:**
Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

***© Shree Somnath Sanskrit University, 2020***

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

**Edition** : First

**Year** : March - 2020

**Copies** : 350

**Price** : ₹510/-

**ISBN** : 978-93-83097-35-7

**Printed by** : Jalaram Graphics & Offset
Nr. Paramhans Appartment, B/h. Hotel Kaveri
S. T. Road, Veraval - 362 266
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-221861

# अभिज्ञानशाकुन्तले कर्मण: सिद्धान्त:

**डॉ. डायालाल एम. मोकरिया,**
आसि. प्रोफेसर,
श्रीसोमनाथसंस्कृतविश्वविद्यालय:,
वेरावलम्, गुजरातप्रान्त: ।

---

काव्येषु नाटकं रम्यमित्युक्त्वा कश्चित् कविः नाटकस्य रम्यत्वं वर्णयति। महाकवि: कालिदास: अपि मालविकाग्निमित्रे कथयति यत्

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।** [१]

जनानां रुचि: भिन्ना भवितुं शक्नोति किन्तु नाट्यं तु सर्वेभ्य: रोचते एव। नाट्ये बाल-युवा-वृद्धेभ्य: सर्वेभ्य: रुचिकरं तत्त्वं प्राप्नोति अत: एव कालिदास: स्मरणं कारयति यत् अयं देवानां चाक्षुषक्रतुरस्ति। नाट्यस्य अप्रतिमं गौरवं दृष्ट्वा आचार्य: भरत: नाट्यशास्त्रे लिखति यत् –

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥** [२]

नाटकस्य वस्तु किमपि भवेत् किन्तु तस्मिन् वयं ज्ञानं, कला, शिल्पं, विद्या इत्यादय: सर्वं दृष्टुं शक्नुम: । अत: एव अत्र मया महाकवे: कालिदासस्य अभिज्ञानशाकुन्तले कर्मण: सिद्धान्त: संशोधित: ।

मनुष्यस्य जीवने कर्म अनिवार्यम् अस्ति। कर्म विना मनुष्यस्य जीवनयात्रा अपि शक्या नास्ति। श्रीमद्भगवद्गीतायां भगवान् कृष्ण: कथयति –

---

१ मालविकाग्निमित्रम् १/४

२ नाट्यशास्त्रम् १/११७

**शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मण: ।**[३]

एवमग्रे अपि कथयति –

**कार्यते ह्यवश: कर्म सर्वै: प्रकृतिजैर्गुणै: ।** [४]

मनुष्य: कर्म करोति तस्य कारणं प्रकृतिजा: गुणा: सन्ति। अत: स: अनिवार्यरूपेण कर्म करोति एव। सांख्यदर्शनानुसारमपि कर्मणि गुणा: महत्त्वपूर्णा: सन्ति।

**प्रीत्यप्रीतिविषादात्मका: प्रकाशप्रवृत्तिनियामार्था: ।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा: ॥** [५]

गुणानां प्रवृत्त्यर्थमपि तत्र वर्णितमस्ति यत्-

**सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रज: ।**
**गुरु वरणकमेव तम: प्रदीपवच्चार्थतो वृत्ति: ॥** [६]

गुणेषु वैशिष्ट्यं भवति तदपि तेषां सम्भूय प्रवृति: भवति। यथा दीपके वर्तिका, तैलम् एवं ज्योति: परस्परं भिन्नमस्ति तदपि प्रकाशस्य क्रियायां सहैव कार्यं कुर्वन्ति तथैव गुणत्रयमपि पूर्वापरसम्बन्धं लक्षीकृत्य कर्म कारयति।

कर्मण: सिद्धान्तस्य सन्दर्भे कर्म, अकर्म एवं विकर्म द्रष्टव्यानि सन्ति। श्रीधरस्वामिनः अनुसारं 'करोति बन्धनमिति' कर्म अर्थात् कर्म बन्धनं कारयति। तं लक्ष्यीकृत्य एव विकर्मण: एवं अकर्मण: अर्थ: अपि स्पष्टीयते। यथा कोऽपि निष्काम:  भूत्वा कर्म करोति तदा तस्य कर्म अकर्म भवति।

---

३ श्रीमद्भगवद्गीता ३/८

४ श्रीमद्भगवद्गीता ४/५

५ सांख्यकारिका - १२

६ तत्रैव - १३

विकर्म निषिद्धं कर्म अस्ति। सामान्यतया प्राचीनाचार्याणां मतानुसारं कर्म इत्युक्ते श्रुति-स्मृति-विहितं कर्तव्यम् वा, विकर्म इत्युक्ते विपरीतं विरुद्धं निषिद्धं वा कर्म एवम् अकर्म इत्युक्ते कर्मणः अभावः। विनोबा भावे, बालगङ्गाधरः तिलकः, जयदयालः गोयन्दका- इत्यादयः अपि कर्मणः स्पष्टतां कुर्वन्ति। तदर्थं मतभेदानि अपि सन्ति किन्तु उपर्युक्तमतानुसारं कर्मणः अर्थं स्वीकृत्य अभिज्ञानशाकुन्तलस्य समीक्षणं प्रस्तुतमस्ति।

अभिज्ञानशाकुन्तले सर्वासु परिस्थितिषु प्रायः संवादः वर्तते। तत्र स्वकर्मणा नाट्यकर्मणा परिषदः प्रसन्नतां प्राप्नुयात् इति कामना कृता वर्तते। अत्र सूत्रधारेण नाट्यकर्मसन्दर्भे सम्पूर्णा सज्जता कृता वर्तते तदपि कर्मणः फलसन्दर्भे शङ्का अस्ति अतः एव कथयति यत् –

**आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।** [७]

कर्मणः फलमपि अत्र अपेक्षितमस्ति अतः अत्र काम्यकर्म दृश्यते। कर्मणः नित्यकर्म, स्वाभाविककर्म, एवं काम्यकर्म इत्यादयः अपि प्रकाराः सन्ति। अत्र नाट्यकर्म सूत्रधारस्य स्वाभाविकं कर्म तु अस्ति किन्तु तस्य सुफलमपि प्राप्नुयात् इति कामना अपि अस्ति। कामनायुक्तकर्मणि बन्धनमस्ति।

दुष्यन्तस्य कण्वाश्रमप्रवेशप्रसङ्गे अपि कर्मवैविध्यं दृश्यते। तपोवनस्य रक्षणं नृपस्य स्वाभाविकं कर्म अस्ति दुष्यन्तः अपि कथयति –

**रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।**
**ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति॥** [८]

---

७ अभिज्ञानशाकुन्तलम् – १/२

८ तत्रैव – १/१३

आश्रमे गजः विघ्नं करोति तदापि दुष्यन्तः शिघ्रं गच्छति। द्वितीयाङ्के अपि ऋषिकुमारौ आगत्य राक्षसेभ्यः रक्षणाय कथयतः -

**तत्र भवतः कण्वस्य महर्षेरसानिध्याद्रक्षांसि न दृष्टविघ्नमुत्पादयन्ति।**

इति श्रृत्वा दुष्यन्तः रक्षणाय सज्जः भवति।

अस्मिन् वाक्ये नित्यकर्मणः अपि स्पष्टः निर्देशः अस्ति। आश्रमस्य गतिविधौ नित्यकर्म वर्णितमस्ति। यथा –

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः**
**प्रस्निग्धाः क्वचिदिङ्गुदीफलमिदः सूच्यन्त एवोपलाः।**

**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-**
**स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किता॥**[९]

अग्रे अपि कविः लिखति –

**कुल्याम्भोभिः पवनचपलैः शाखिनौ धौतमूला**
**भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।**

**एते चार्वागुपवन भुविच्छिन्नदर्भाङ्कुरायां**
**नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति॥** [१०]

अत्र कण्वऋषेः आश्रमस्य दैनिकजीवनस्य सुन्दरं चित्रं प्रस्तुतम् अस्ति। आश्रमस्य वृक्षाणां जलसेचन्तीनां वर्णने अपि आश्रमजीवनं प्रत्यक्षं भवति। तथैव मारीचीऋषेः आश्रमे अपि आश्रमवासीनां वर्णनकर्मणः विभावना दृश्यते। अत्र दैनिकजीवनस्य वर्णने नित्यकर्म अस्ति।

---

[९] अभिज्ञानशाकुन्तलम् – १/१४

[१०] तत्रैव – १/१५

राजमाता दुष्यन्तस्य कृते पुत्रपिण्डपालनव्रतं करोति तत्र काम्यकर्म अस्ति। दुष्यन्तस्य समक्षमपि आश्रमस्य रक्षणमेवं मातुः आज्ञा – कर्मद्वयं आयाति तदा सः आश्रमस्य रक्षणकर्म चयति। तदा सः स्वार्थं त्यक्त्वा राजधर्मस्य पालनाय आश्रमरक्षणस्य कर्म स्वीकरोति।

शकुन्तलाविदायप्रसङ्गे नैमित्तिककर्म दृश्यते। एकः पिता यथा पुत्र्याः चिन्तां करोति तथैव कण्वऋषिः पुत्रीविदायनिमित्ते आदर्शपितृवत् व्यवहारं करोति। उपदेशमपि ददाति। -

**शुश्रूषस्व गुरुन्कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तृर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**

**भूयिष्ठं भव दक्षिणा परिजने भाग्येश्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥** [११]

शकुन्तलाविदायप्रसङ्गे सामाजिकरीतेः कविना सुन्दरं चित्रं प्रस्तुतं कृतम्। अत्र कन्याविदायप्रसङ्गस्य अलङ्कारसज्जता, स्वस्तिवाचनं, उपदेशवचनानि इत्यादीनि सर्वाणि निमित्तकर्माणि निरुपितानि सन्ति।

मनुष्यजीवने कर्मणः फलमपि अनिवार्यम् अस्ति। जनः शुभकर्मणः शुभमेवमशुभकर्मणः अशुभं फलं प्राप्नोति। अभिज्ञानशाकुन्तले अपि कविः वर्णयति यत् आंशिकमपि निषिद्धमयोग्यं कर्म भवति तस्य दुःखदायकं फलं प्राप्यते। राजा दुष्यन्तः शकुन्तलां प्रति प्रणयं विदूषकं कथयति अनन्तरमयं परिहासः आसीत् तथा वदति, इदं निषिद्धं कर्म अस्ति अतः दुष्यन्तः शकुन्तलां ज्ञातुं न शक्नोति। विदूषकः कदापि इयं प्रसङ्गं न स्मारयति। शकुन्तला परिवारस्य सम्मतिं विना दुष्यन्तेन सह विवाहं करोति अतः एव दुष्यन्तः शकुन्तलां न स्वीकरोति तदा परिवारः अपि किमपि साहाय्यं न करोति। अत्रापि निषिद्धकर्मणः दुःखदायकं फलं भवति। कण्वः शकुन्तलायै

---

११ अभिज्ञानशाकुन्तलम् ४/१८

अतिथिसत्कारस्य कार्यं दत्त्वा सोमतीर्थं गच्छति। किन्तु दुष्यन्तस्य वियोगिनी शकुन्तला दुर्वासामुनेः स्वागतं न कर्तुं शक्नोति। स्वकर्मणि भ्रष्टा शकुन्तला मुनेः शापं प्राप्नोति।

राजनीतौ अपि दुष्कर्मणः कृते दण्डरूपं फलं गृध्रबलिः आसीत् चौर्यकर्मणः फलं गृध्रबलिः आसीत् तस्मिन् एव प्रसङ्गे स्वधर्मस्य गौरवम् अपि वर्णितमस्ति।

**सहजं किल यद्विनिन्दितं न खलुतत्कर्म विवर्जनीयम्।** [१२]

मनुष्यस्य सहजं कर्म निन्दितं भवेत् तदपि न त्याज्यम्।
अत्र भगवद्गीतायाः श्लोकः स्मर्यते-

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।** [१३]

ईशोपनिषदि अपि उक्तमस्ति यत्-

**कुर्वन्नेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरः॥** [१४]

भगवान् तत्र कथयति यत् – **स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।**[१५]

स्वकर्म कुर्वन् नरः पापं न प्राप्नोति।अतः मनुष्यैः स्वकर्म स्वाभाविकं सहजं कर्म एव कर्तव्यम्। यः मनुष्यः स्वकर्म करोति सः एव सिद्धिं लभते।

---

[१२] तत्रैव – ६/१

[१३] श्रीमद्भगवद्गीता – १८/४८

[१४] ईशोपनिषद् - २

[१५] श्रीमद्भगवद्गीता – १८/४६

**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवाः।** [१६]

दुष्यन्तः एकः राजा अस्ति। आश्रमस्य रक्षणं, पालनं, एवं तं प्रति आदरभावः नृपस्य कर्तव्यम् अस्ति। नाटकस्य प्रारम्भे वैखानसस्य वचनं स्वीकृत्य दुष्यन्तः आश्रमस्य मृगं न हन्ति एवं चक्रवर्तिनः पुत्रसुपत्नयाः आशीर्वादं लभते। मारिचऋषेः आश्रममपि पूज्यभावात् गच्छति एवं पुत्रेण सह पत्नीं शकुन्तलां प्राप्नोति। इत्थं स्वकर्मणि रतः दुष्यन्तः सुफलं प्राप्नोति।

कर्मणः यत् फलं भवति तस्मिन् कोऽपि परिवर्तनं कर्तुं न शक्नोति। कण्वः शकुन्तलायाः प्रतिकुलं दैवं शमयितुं सोमतीर्थं गच्छति। किन्तु तदपि तस्याः भाग्ये यत् प्रतिकूलमासीत् तत् भवति एव। महाकविकालिदासस्य शब्दैः एव वक्तव्यम् यत् – **भवितव्यानां द्वाराणि भवन्ति सर्वत्र।**[१७] भाग्यस्य निर्माणमपि कर्मणा एव भवति। तेन एव -

**भाग्यानि पूर्वतपसा खलु सञ्चितानि,**
**काले फलन्ति पुरुषस्य यथा वृक्षाः।** [१८]

जनः श्रापमेवं आशीर्वादं प्राप्नोति। शकुन्तला श्रापं प्राप्नोति एवं दुष्यन्तः आशीर्वादं प्राप्नोति तत्राऽपि कर्मणः सिद्धांतः एव अस्ति।

---

[१६] श्रीमद्भगवद्गीता – १८/४७

[१७] अभिज्ञानशाकुन्तलम् – १/१६

[१८] सुभाषितबोधः पृ. २४